

# सुधीन्द्र रचनामृतं

सेवा समर्पण - प्रथम पुण्यतिथि आराधना महोत्सव

- १ -

## || गुरुपरम्परा स्तवनम् ||

जयति जयति योगी वासवीनन्दनोऽयं
शृणुत शृणुत सन्तः सज्जनोद्धारकोऽयम् |
नमत नमत भक्त्या सन्नतानुन्नयन्तं
वृणुत वृणुत कामं भक्त-कल्पद्रुमोऽयम् ||१||

अपूर्व-कल्पद्रुम एष देवः व्यासः सतांसद्गतिदो मुनीन्द्रः |
मातेव पुत्राय हितं हि नित्यं दत्ते स्वभक्ताय विनैव याञ्चाम् ||२||

नौमि वेधसममोघदर्शनं शारदां हरिपदाब्जभक्तिदाम् |
मारुतिं प्रणत सन्मतिप्रदं भारतीं च सुमतिप्रदां शुभाम् ||३||

लक्ष्मीश-पादाम्बुजभृङ्ग-रूपं ज्ञानेन दिव्येन सुखेन पूर्णम् |
श्रीमध्वसूर्यं निज-भक्त-मोह-तामिस्रनाशं प्रणमामि भक्त्या ||४||

ज्ञानादि गुणसम्पन्नान् प्रपन्नापन्निवारकान् |यादवेन्द्र-गुरून्वन्दे व्यासमध्वार्चने रतान् ||५||

यादवेन्द्र-पदाम्बोधि-जातचन्द्रान्मुदा भजे |भक्ततापत्रय-हरान्केशवेन्द्रान् तपोधनान् ||६||

श्रीमदुपेन्द्रपदाम्बुजयुग्मं शान्तिदयामुखसद्गुणपूर्णम् |
सन्नतशिष्यजनोन्नति-दक्षं नौमि सदा नतमङ्गलकारी ||७||

श्री-केशवेन्द्र-सच्छिष्यान् रूपौदार्यगुणाम्बुधीन् |यादवेन्द्रान् भजे भक्त्या भक्तोद्धरणतत्परान् ||८||

श्री बादरायणसमर्चनलब्धशुद्ध-कल्याणसद्गुणनिधीन् करुणापयोधीन् |
वन्दे नृसिंह-पदपङ्कजदर्शनेनसम्प्राप्तशाश्वतसुखान् गुरुराघवेन्द्रान् ||९||

देवेन्द्रतीर्थान्निजशिष्यवर्गान् श्रीशाङ्घ्रिभक्तान्निजधर्मयुक्तान् |
सन्मार्गगांश्चक्रुरिति प्रसिद्धिं प्रापुर्गुरूस्तान् प्रणमामि भक्त्या ||१०||

श्रीमाधवेन्द्रान् नतपारिजातान् सद्भिः समाराधित-योगिवर्यान् |
दान्तान् प्रशान्तान् सततं नमामि श्रीव्यासरामार्चनशुद्धसत्त्वान् ||११||

भक्त्युपास्तिसरिद्युक्तान् तत्त्वज्ञानमहार्णवान् | ज्ञानीन्द्रान् सततं वन्दे भक्तिज्ञानाप्तये हरेः ||१२||



व्यासरामपदकञ्जषट्पदान् शान्तिनिर्जितसमस्तकिल्बिषान् |
यादवेन्द्र-यति-पुङ्गवान्मुदा सन्नमामि परविष्णुभक्तिदान् ||१३||

उपेन्द्रतीर्थान् समुदारचित्तान् नितान्तशिष्योन्नतिदत्तचित्तान् |
उपेन्द्रनित्यार्चनपूतचित्तान् प्रणौमि पाराशरसक्तचित्तान् ||१४||

राजेन्द्रतीर्थान् यतिवंशचन्द्रान् मुनीन्द्रपाराशररामदासान् |
जितेन्द्रियान् सत्यदयादमेतान् वन्दे गुरून् मानितसंयमीन्द्रान् ||१५||

गुरौ भक्त्या हरौ भक्तिं प्राप्य निर्मुक्तबन्धनान् | हरौ लीनान् विष्णुतीर्थान् वन्दे सन्नतकन्धरः ||१६||

सूरीन्द्र-तीर्थान् यतिधर्मनिष्ठान् सूरीडितान् सूरीजनेष्ट-दातॄन् |
प्रपन्नपालान् सततं प्रपद्ये श्री-व्यासरामार्चनबद्धदीक्षान् ||१७||

सुरगुरुसमबुद्धीन् व्यासरामार्चनेन विगतसकलदोषान् सच्चरित्रान् शुभाङ्गान् |
विबुधवरशौण्ढान् सज्जनाराधिताङ्घ्रीन् यतिवरविबुधेन्द्रान् संततं सन्नमामि ||१८||

शीलेन बुद्ध्या वचसाथ भक्त्या दमेन शान्त्या च युतान् वरेण्यान् |
श्रीव्यासरामाङ्घ्रिसरोजभृङ्गान् नमामि भक्त्या सुमतीन्द्रतीर्थान् ||१९||

श्रीशार्चकान् श्रीवसुधेन्द्रतीर्थान् सुमङ्गलान् सद्गुरुपादभक्तान् |
भक्तेष्टदान् सच्चरितान् यतीन्द्रान् नमामि पाराशरभक्तवर्यान् ||२०||

श्रीरघुचन्द्रपराशरपुत्र-पूजनतत्परसद्गुरुवर्यान् |
भक्तजनेष्टदमङ्गलमूर्तीन् श्रीभुवनेन्द्र यतीन् प्रणमामि ||२१||

विधीशमुख्यैः वरदेशदेवैः सम्पूजिते व्यासरघूत्तमाङ्घ्री |
समर्चिषुर्येति मुदा च भक्त्या वन्दे गुरूंस्तान् वरदेन्द्र-तीर्थान् ||२२||

यत्प्रेक्षणं प्रेक्षकपापनाशनं यद्वन्दनं वन्दकपुण्यपोषणम् |
यत्सेवनं सेवकभक्तिवर्धनं वन्दे सुशीलान् सुकृतीन्द्रसद्गुरून् ||२३||

गुरुप्रसादाल्लभतेऽत्र मानवः हरिप्रसादं तपसाऽपि दुर्लभम् |
गुरुप्रसादेप्सु-सुधीन्द्र-संयमी काशीमठीयो तनुते गुरुस्तवम् ||२४||

गुरुस्तवमिमं भक्त्या श्रद्धया च पठन्नरः | गुरौ तथा हरौ भक्तिं लभेत च शुभाम्मतिम् ||२५||

||इति श्री गुरुपरम्परा स्तवनम् ||



# सुधीन्द्र रचनामृतं

सेवा समर्पण - प्रथम पुण्यतिथि आराधना महोत्सव

- २ -

## || श्री बालव्यास स्तोत्रम् ||

सत्याय नित्याय जगद्धिताय शुद्धाय बुद्धाय परात्पराय |
दिव्याङ्गना-सत्यवतीसुताय व्यासाय बालाय नमो नमस्ते ||१||

वसिष्ठवंशोद्भव-सम्भवाय पूर्णाय चन्द्राय मनोहराय |
दिव्याय रम्याय रमाधवाय व्यासाय बालाय नमो नमस्ते ||२||

वन्द्याय वन्द्यामरवन्दिताय वेद्याय देवाखिलपालकाय |
वन्दारुभक्तामरपादपाय व्यासाय बालाय नमो नमस्ते ||३||

दातुं सुखं योगिपराशराय सूर्यात्मजाद्वीपगतो बभूव |
प्रादुर्भवो यस्य हरेस्तु तस्मै व्यासाय बालाय नमो नमस्ते ||४||

लोके पवित्रं परमं प्रसिद्धं कालप्रियाख्यं तु बभूव तीर्थम् |
यज्जन्मना लोकगुरोस्तु तस्मै व्यासाय बालाय नमो नमस्ते ||५||

ज्ञानं प्रदातुं नत-सज्जनेभ्यः वैकुण्ठ-लोकाद्भुवमागताय |
कारुण्यपूर्णाय गुणार्णवाय व्यासाय बालाय नमो नमस्ते ||६||

अर्चन्ति भक्त्या सुरसिद्धसङ्घाः गायन्ति देवर्षिमहर्षिवर्याः |
भक्तप्रियंयंपरमंतुतस्मैव्यासायबालायनमोनमस्ते ||७||

यस्य स्मितंदिव्यसुखप्रदानं सुमुग्धसंमोहन-चारुवक्त्रम् |
तस्मै जगन्मोहनसुन्दराय व्यासायबालायनमोनमस्ते ||८||

ऊरौजनन्याःपरिशोभितायप्रेम्णास्वपित्राबहुलालिताय |
दिव्याङ्गनानामपिमोहनायव्यासायबालायनमोनमस्ते || ९||

श्रीशो जगत्पालनहेतवेऽत्र प्रादुर्बभूवेति सुलक्षणैस्स्वैः |
संसूचकायाति-सुदर्शनाय व्यासाय बालाय नमो नमस्ते ||१०||

स्वयोगमायां परिदर्शयन् यः शिशुर्बभूवाति-सुदर्शनीयः |
दिव्यो वटुस्तादृश-वैभवाय व्यासायबालायनमोनमस्ते ||१०||

काशीमठीय सुकृतीन्द्र-पदारविन्द-भृङ्गेन निर्मितमिदं स्तवनं पवित्रम् |
पाराशरस्य अगणनीयगुणार्णवस्य नित्यं पठन् भुवि नरो लभते शुभानि ||

||श्री बालव्यास स्तोत्रम्||



- ३ -

## || श्री नृसिंहाष्टकम् ||

श्रीपतिं विधीश-शक्र-देव-वृन्दवन्दितं वत्स-गौतमात्रि-कश्यपादि-योगि-पूजितम् |
भक्तवर्य-दैत्यराज-पुत्र-सन्ततार्चितं श्रीकरं नृसिंहमाश्रये दयाघनं हरिम् ||१||

अद्भुताकृतिं नरं हरिं परात्परं प्रभुं भद्रमुग्र-रूपिणं नतेष्ट-वत्सलं विभुम् |
भक्त-मोहनं सुरारि-भीषणं मुरान्तकं श्रीकरं नृसिंहमाश्रये दयाघनं हरिम् ||२||

वेदवेदितार्थ-तत्वगम्यरूपमव्ययं निर्मलं निरामयं प्रतीतिदूरमीश्वरम् |
निर्गुणं समस्त-दिव्य-सद्गुणाकरं परं श्रीकरं नृसिंहमाश्रये दयाघनं हरिम् ||३||

सूर्यचन्द्र-लोचनं त्रिलोचनेन पूजितं सिंहविक्रमं त्रिविक्रमं त्रिलोक-पालकम् |
अक्रमादि दोषपूर्ण दुष्टमारण क्रमं श्रीकरं नृसिंहमाश्रये दयाघनं हरिम् ||४||

मेघनाद-शङ्खिनं सुरारिघाति-चक्रिणं दैत्यजानुदारिणी-गदायुतं रमाप्रियम् |
कामलोभमोहकोपनाशि-पद्मभूषितं श्रीकरं नृसिंहमाश्रये दयाघनं हरिम् ||५||

अप्रमेयमच्युतं समस्तवेदसंस्तुतं भक्तिलभ्य-दिव्यदृष्टिगोचरं त्वतीन्द्रियम् |
तत्त्वमेकमद्भुतं समस्तजीवजीवनं श्रीकरं नृसिंहमाश्रये दयाघनं हरिम् ||६||

दानवारिपोषणंसुरारिवंशशोषणंइन्द्रियेशमिन्दिरापतिंहृदब्जवासिनम्|
कादिशीमठीय-सर्व-योगिवर्यपूजितंश्रीकरं नृसिंहमाश्रये दयाघनं हरिम् ||७||

भक्तभीष्ममुक्तिदं विभीषणाभयप्रदं कादिशीमठीय-राघवेन्द्र-नेत्रगोचरम् |
पन्नगारिवाहनंभुजङ्गराजशायिनंश्रीकरं नृसिंहमाश्रये दयाघनं हरिम् ||८||

काशीमठीय सुकृतीन्द्र-यतीन्द्र-पाद-प्रेमाभिलाषुक-सुधीन्द्र-यति-प्रणीतम् |
स्तोत्रं पठन्नरहरेर्नियतं मनुष्यःप्राप्नोति भक्तिमतुलां गरुडध्वजस्य ||९||

||इति श्री नृसिंहाष्टकम्||



# सुधीन्द्र रचनामृतं

सेवा समर्पण - प्रथम पुण्यतिथि आराधना महोत्सव

- ४ -

## || श्री श्रीनिवास स्तुतिः ||

श्रीमन्नारायणं वन्दे श्रीलक्ष्मीवेङ्कटेश्वरम् |
कल्याणगुणसम्पूर्णं शरणागतवत्सलम् ||१||

दुस्तरात् कलिमालिन्यात् उद्धर्तुं प्रणतान् जनान् |
आश्रये श्रीपतिं नित्यं वैकुण्ठात् भुवमागतम् ||२||

विधीश-मुखगीर्वाण-वन्दिताङ्घ्रि-सरोरुहम् |
नमामि नम्र-शिरसा प्रणताघविनाशनम् ||३||

यत्-पादसम्भवा गङ्गा पुनाति सकलं जगत् |
वन्दारुजन-मन्दारं वन्दे तं श्रीनिकेतनम् ||४||

यन्नाभिपद्मसम्भूतो स्वयंभूरखिलं जगत् |
ससर्ज तं मुदा वन्दे पद्मावतिपतिं हरिम् ||५||

दीना वयं दीननाथ पूर्णषड्गुणविग्रह |
भक्तवत्सल विश्वेश पाहि नो शरणागतान् ||६||

गुणैर्हीनाः दोषयुक्ताः वयंदेव दयानिधे |
प्रणमामो मुदा भक्त्या तव सेवां प्रदेहि नः ||७||

पितेव शाधि नो देव मातेव परिपालय |
दययैव विभो विष्णो आश्रितान् श्रितवत्सल ||८||

श्रीनिवास-स्तुतिमिमां नित्यं यो मानवो पठेत् |
कलिमालिन्य-निर्मुक्तो सफलां कुरुते जनिम् ||९||

||इति श्री श्रीनिवास स्तुतिः||



# सुधीन्द्र रचनामृतं

सेवा समर्पण - प्रथम पुण्यतिथि आराधना महोत्सव

- ५ -

## || गोश्रीपुरेश श्री वेङ्कटेश ||

विधीशेन्द्रवृन्दारकैः पूजिताङ्घ्रिं मरुत्पुत्रपक्षीन्द्रविघ्नेशसेव्यम् |
नतं पुत्रवत्पालयन्तं दयालुं भजे वेङ्कटेशं रमेशं सुरेशम् ||१||

मुरारिं सुरारीन्द्र-वंश-प्रणाशं अघारिं नताघौघनाशं प्रकाशम् |
सदानन्दमीशं चिदाकाशवासं भजे वेङ्कटेशं रमेशं सुरेशम् ||२||

पवित्रंचरित्रं विचित्रंतु यस्य श्रुतं श्रद्धया चिन्तितं कीर्तितं च |
ददातीशभक्तिंमनोवाञ्छितंतं भजे वेङ्कटेशं रमेशं सुरेशम् ||३||

प्रभुं पद्मनाभं विभुंविश्वनाथं रमावल्लभंमाधवंचित्प्रकाशम् |
गुरूणांगुरुंशाश्वतं शाश्वतानां भजे वेङ्कटेशं रमेशं सुरेशम् ||४||

सतांपोषणं शासकंदुर्जनानां हरिं शोभनं सज्जनानां शरण्यम् |
दयापूर्णनेत्रं धराश्रीकलत्रं भजे वेङ्कटेशं रमेशं सुरेशम् ||५||

मनोज्ञं शरीरं वरेण्यंच दिव्यंसुरैः किन्नरैः सेवितं योगिवर्यैः |
प्रसन्नंमुखंयस्य माङ्गल्यदंतं भजे वेङ्कटेशं रमेशं सुरेशम् ||६||

स्वभक्तेष्टदानोत्सुकं भक्तिगम्यं नितान्तोद्यतंभक्तकष्टप्रणाशे |
महौदार्य-सौशील्य-वात्सल्यपूर्णं भजे वेङ्कटेशं रमेशं सुरेशम् ||७||

सुपर्णे तु हैमेऽधिरूढं मनोज्ञं महाविष्णुयागोत्सवे माधवस्य |
महारत्नभूषातिरम्यं प्रसन्नंभजे वेङ्कटेशं रमेशं सुरेशम् ||८||

द्विजैः गौडसारस्वतैर्याचितोऽयं पुरे गोश्रियाख्ये स्वभक्तेष्टदाता|
शुभे मन्दिरे पूजितो देवदेवो रमावेङ्कटेशःप्रसन्नोऽस्तु नित्यम् ||९||

काशीमठीय-सुकृतीन्द्र-यतीन्द्रपाद-शिष्येण निर्मितमिदं स्तवनंपवित्रम् |
गोश्रीपुरेश-वरवेङ्कटनायकस्य भक्तिं लभेत मनुजो प्रपठन् मुरारेः ||१०||

||इति गोश्रीपुरेश श्री वेङ्कटेश भुजङ्गप्रयातम् ||



# सुधीन्द्र रचनामृतं

सेवा समर्पण - प्रथम पुण्यतिथि आराधना महोत्सव

- ६ -

## || श्री वामन स्तवनंम् ||

शोभना-दितिश्चचार दुष्करं पयोव्रतं कश्यपोऽपि भक्तिपूर्णपूजया तुतोष यम् |
भक्तवत्सलो हरिर्भुवं दयालुराययौ तं नमामि वामनं जगन्मनोहरं परम् ||१||

आत्मजं चतुर्भुजं पदाब्ज-चक्रधारिणं दिव्यतेजसायुतं निरीक्ष्य कश्यपादिती |
प्रेमतः प्रणेमतुर्गदायुतं प्रभुं हरिं तं नमामि वामनं जगन्मनोहरं परम् ||२||

यस्य जन्मना बभूव कश्यपो महान् भुवि विश्व-सृङ्ग्विधिश्च यस्य नाभि-पद्म-सम्भवः |
यद्दया ददौ पुरन्दराय शक्रतां पुनः तं नमामि वामनं जगन्मनोहरं परम् ||३||

यत्पदाब्जसम्भवा पितामहस्य पूजया जाह्नवीनदी जटां विवेश शङ्करस्य तु |
यत्नतो भगीरथस्य भूमिमागता तथा तं नमामि वामनं जगन्मनोहरं परम् ||४||

इन्द्रशत्रु-दैत्यराट्-बलीन्द्र-निग्रहेच्छया यज्ञवाटमाविशन्तं-इन्दिरापतिं बलेः |
वीक्ष्य तस्य तेजसा जिताः समस्त-याज्ञिकाः तं नमामि वामनं जगन्मनोहरं परम् ||५||

यन्मुखं समीक्ष्य लज्जितो बभूव चन्द्रमाः मन्मथो पराजितोऽभवत् यदङ्गशोभया |
यस्य तेजसा समस्त-ज्योतिषां कुलं मितं तं नमामि वामनं जगन्मनोहरं परम् ||६||

दिव्य-भव्य-मुग्ध-मूर्ति-दर्शनेन मोहिताः देवदैत्यविप्रवर्यतापसा उपस्थिताः |
नैव तृप्तिमापुरस्य दर्शनेन विस्मिताः तं नमामि वामनं जगन्मनोहरं परम् ||८||

छत्रदण्ड-मेखलाजिनादि-भूषितं वटुं ब्रह्मतेजसा भृशंप्रफुल्लितं स्मिताननम् |
शासितारमीशितारमीप्सितप्रदायकं तं नमामि वामनं जगन्मनोहरं परम् ||७||

विक्रमत्रयेण सर्वलोकमापनं कृतं श्रीत्रिविक्रमो बभूव पावितं जगत्रयम् |
अन्तहीनता हरेस्तु दर्शिता जगत्रये तं नमामि वामनं जगन्मनोहरं परम् ||९||

निग्रहो बलेरभूदनुग्रहो महान्हरेः वासवं त्रिलोकनायकं चकार श्रीपतिः |
दर्शिता हरेः कृपा बलीयसी निरन्तरा तं नमामि वामनं जगन्मनोहरं परम् ||१०||

काशीमठीय सुकृतीन्द्र-कृपाकटाक्षात् तच्छिष्य-निर्मितमिदं स्तवनं पवित्रम् |
श्री-वामनस्य सततं परमादरेण प्राप्नोति भक्तिमतुलां प्रपठन् मनुष्यः ||११||

||इति श्री वामन स्तवनंम्||



# सुधीन्द्र रचनामृतं

सेवा समर्पण - प्रथम पुण्यतिथि आराधना महोत्सव

- ७ -

## || श्री अश्वत्थनारायण स्तोत्रम् ||

समस्त-सन्मङ्गलदायकाय प्रपन्न-तापत्रयनाशकाय |
नमोऽस्तु ते सन्नतपालकाय अश्वत्थनारायणपादपाय ||१||

नित्यस्वरूपाय निरामयाय सतां शरण्याय दयामयाय |
समाश्रितानां सुरपादपाय नमोऽस्तु ते देव-समर्चिताय ||२||

अनन्तकल्याण-गुणैकधाम्नः विष्णोः स्वरूपाय सदाशिवाय |
समस्त-वृक्षान्वय-नायकाय अश्वत्थ-वृक्षाय नमो नमस्ते ||३||

खगैर्मृगैर्वानर-किन्नरैश्चसुरैर्नरैर्योगिवरैर्मुनीन्द्रैः
तपस्विभिःकिम्पुरुषैश्चनित्यंसमाश्रितायास्तुततिर्नतीनाम् ||४||

ददाति सौख्यं प्रणतो विनम्रं निहन्ति दुःखं विनुतःप्रपन्नः|
करोति धन्यं निज-भक्तवृन्दंनमामि भक्त्या तमनादिवृक्षम् ||५||

यन्मूलभागे कमलोद्भवोऽजो यन्मध्यभागे कमलाप्रियश्च |
यदग्रभागे कमलेशमित्रः समाश्रये तं तरुवंशनाथम् ||६||

समस्त-वृन्दारकवासभूमिःमहौषधीनामयमेवराजा|
विहङ्गमानांसुखवासभूमिःअश्वत्थनारायणएषभाति ||७||

प्रदक्षिणायस्यसुमङ्गलावहानमस्कृतिर्यस्यसुसंस्कृतिप्रदा |
सेवाकृताभक्तियुतेनचेतसालोभादिषड्वैरिविनाश-दक्षा ||८||

भक्तेष्टदानेनिरतंदयालुंनारायणंभूरुहरूपधारिणम् |
संसार-सन्तापहरंसुधांशुतंवृक्षराजंशिरसानमामि ||९||

संस्तूयप्रणतोऽश्वत्थःस्तोत्रेणानेनसज्जनान् | तृप्तिंतुष्टिंदयांचैवदत्वापायादपायतः||१०||

||इति श्री अश्वत्थनारायण स्तोत्रम्||

Visit www.gsbsamajws.in/sudhrach for audio downloads and to watch Youtube videos



# सुधीन्द्र रचनामृतं

सेवा समर्पण - प्रथम पुण्यतिथि आराधना महोत्सव

- ८ -

## श्री-सुकृतीन्द्र स्तोत्रम् च स्तुतिः

### || श्री-सुकृतीन्द्र स्तोत्रम् ||

श्री-सुकृतीन्द्र-यतीन्द्रवरेण्यान्
सन्नतदुःखनिवारणदीक्षान् |
शान्तिदयाविनयादि-गुणेढ्यान्
भक्तियुताःसततं प्रणमामः ||

### || श्री-सुकृतीन्द्र स्तुतिः ||

श्री-व्यासरामपादाब्ज-मधुपानेन सन्ततम् | नित्यानन्दान् यतीन् श्रीमद् सुकृतीन्द्र-गुरून् भजे ||१||

एकाग्र-मनसानित्यंनियमेनजपादिभिः | निगृहीतेन्द्रियान्श्रीमद् सुकृतीन्द्र-गुरून् भजे ||२||

मनसाकर्मणावाचानकिञ्चिदपिदुष्कृतम् | कृतंयैःशुद्ध-सत्त्वान्तान्सुकृतीन्द्र-गुरून् भजे ||३||

करुणा-पूर्णमनसा स्नेहपूर्णेक्षणैस्तथा | ददुर्ये दिव्यमानन्दंसुकृतीन्द्र-गुरून् भजे ||४||

लाञ्छनेन विनिर्मुक्तं पूर्णिमा-शशिमण्डलम् | यन्मुखं तान् श्रीमद् सुकृतीन्द्र-गुरून् भजे ||५||

यद्वाणी वेदवाणीव सत्या भवति सन्ततम् | व्यास-रामप्रसादेन सुकृतीन्द्र-गुरून् भजे ||६||

यत्पाद-पद्मसेवा तु गङ्गापूजा न संशयः| श्रीश-भक्तिप्रदानत्वात् सुकृतीन्द्र-गुरून् भजे ||७||

यत्पादमङ्ग्ल-स्पर्शः तूलराशिंयथानिलः | निवारयति पापौघंसुकृतीन्द्र-गुरून् भजे ||८||

दर्शनेनैव भक्तानां जन्म-जन्मार्जितमलम् | नाशयदचिरादेव तान् सद्गुरुवरान् भजे ||९||

यत्पाद-पद्मयोस्सक्ताः भक्त-भृङ्गा मधुप्रियाः | भक्त्या समाश्रयन्ते तान् सुकृतीन्द्र-गुरून् भजे ||१०||

सुधीन्द्रयतिनाभक्त्याकृतंस्तोत्रंतुश्रद्धया | अनेनप्रीयतांश्रीशःसद्गुरोर्हृदिसंस्थितः ||११||

||इति श्री सुकृतीन्द्र स्तुतिः||